# मम मित्रं भवन्तु

अद्यत्वे समाजे वयं द्वेषपूर्णं कलहपूर्णं च वातावरणं पश्यामः। प्रायः लोभाकृष्टाः जनाः लोकविरुद्धम् आचरन्ति। समाजस्य सुखाय लोभः न कर्तव्यः। अस्माभिः परस्परं मैत्रीभावेन व्यवहर्तव्यम्। सर्वा प्रकृतिः अपि मानवेभ्यः कल्याणमयं सन्देशं यच्छति। अस्मिन् पाठे वयम् इमं सन्देशम् एव पठिष्यामः।

1. *शं नः सूर्य उरुचक्षा उदेतु,*
   *शं नश्चतस्रः प्रदिशो भवन्तु।*
   *शं नः पर्वता ध्रुवयो भवन्तु,*
   *शं नः सिन्धवः शमु सन्त्वापः ॥* (ऋग्वेद 7/35/8)



***सन्धिच्छेदः***

शम् नः सूर्यः उरुचक्षाः उदेतु। शम् नः चतस्रः प्रदिशः भवन्तु।
शम् नः पर्वताः ध्रुवयः भवन्तु। शम् नः सिन्धवः शम् उ सन्तु आपः।।

***पदान्वयः***

उरुचक्षाः सूर्यः नः शम् उदेतु। चतस्रः प्रदिशः नः शम् भवन्तु।
ध्रुवयः पर्वताः नः शम् भवन्तु। सिन्धवः नः शम् । उ आपः शम् सन्तु।।

***शब्दार्थाः***

| | | |
|---|---|---|
| शम् | = | कल्याणम् |
| उरुचक्षाः | = | अतिप्रकाशवान् |
| ध्रुवयः | = | दृढाः, दृढतया स्थिताः |
| सिन्धवः | = | सरितः, सागराः च |
| उ | = | अथ, च |
| आपः | = | जलानि |

***भावार्थ :***

सूर्यस्य उदयः सर्वेषां कल्याणाय भवेत्। पूर्व-पश्चिम-उत्तर-दक्षिणाः इति चतस्रः दिशः, दृढतया स्थिताः पर्वताः, सरितः सागराः अन्यानि जलानि च सर्वेषां कल्याणं कुर्वन्तु। सर्वा प्रकृतिः सर्वेषां कृते शुभदायिका भवेत्।

***2. मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम् ।***
***मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे ।***
***मित्रस्य चक्षुषा वयं सर्वाणि भूतानि समीक्षामहे।।*** (यजुर्वेदः 36/10/18)

***सन्धिच्छेदः***

मित्रस्य + अहम्

***पदान्वयः***

सर्वाणि भूतानि मा (माम्) मित्रस्य चक्षुषा समीक्षन्ताम्। अहम् मित्रस्य चक्षुषा सर्वाणि भूतानि समीक्षे। वयम् मित्रस्य चक्षुषा सर्वाणि भूतानि समीक्षामहे।।

***शब्दार्थाः***

| | | |
|---|---|---|
| भूतानि | = | प्राणिनः, जीवाः |
| मा | = | माम् |
| चक्षुषा | = | नेत्रेण, दृष्ट्या |
| समीक्षन्ताम् | = | पश्यन्तु |
| समीक्षे | = | पश्यामि |
| समीक्षामहे | = | पश्येम |

***भावार्थः***

सर्वे प्राणिनः मम मित्राणि सन्ति। मित्रता सुखदायिनी भवति। यस्मिन् परिवारे समाजे वा परस्परं स्नेहः विश्वासः च भवतः तत्र आनन्दमयं वातावरणं भवति। जनेषु मैत्रीसम्बन्धः विकासं प्राप्नोतु। सर्वे जनाः सर्वान् प्राणिनः मित्रवत् पश्यन्तु। अहम् अपि सर्वान् मित्रताभावेन पश्यामि। वयं सर्वे अपि सर्वान् मैत्रीभावेन पश्येम।

3. ***अभयं मित्रादभयममित्राद्,***
***अभयं ज्ञातादभयं पुरो यः।***
***अभयं नक्तमभयं दिवा नः,***
***सर्वा आशा मम मित्रं भवन्तु।।*** (अथर्ववेद 19/15/6)

***सन्धिच्छेदः***

अभयम् मित्रात् अभयम् अमित्रात्। अभयम् ज्ञातात् अभयम् परोक्षात्।

अभयम् नक्तम् अभयम् दिवा नः। सर्वाः आशाः मम मित्रम् भवन्तु।।

**पदान्वयः**

मित्रात् नः अभयम्, अमित्रात् अभयम्, ज्ञातात् अभयम्, परोक्षात् अभयम्, नक्तम् अभयम्, दिवा अभयम्। सर्वाः आशाः मम मित्रम् भवन्तु।

**शब्दार्थाः**

| | | |
|---|---|---|
| नः | = | अस्मभ्यम् |
| अभयम् | = | निर्भयता |
| अमित्रात् | = | शत्रोः, यत् मित्रं न अस्ति तस्मात् |
| ज्ञातात् | = | परिचितात् जनात् |
| परोक्षात् | = | अपरिचितात्, अज्ञातात् जनात् |
| नक्तम् | = | रात्रौ |
| दिवा | = | दिने |
| आशाः | = | दिशः |

**भावार्थः**

अस्माकं जीवनं भयरहितं भवेत्। कोऽपि मित्रात्, शत्रोः, परिचितात् अपरिचितात् वा मनुष्यात् केभ्यश्चित् वा भययुक्तः न भवेत्। वयम् दिने वा रात्रौ वा सर्वे भयरहिताः भवेम । मित्रभूताः सर्वाः दिशः अस्मान् सुखयन्तु।

4. ***ईशावास्यमिदं सर्वं***
***यत्किञ्च जगत्यां जगत्।***
***तेन त्यक्तेन भुञ्जीथाः***
***मा गृधः कस्यस्विद् धनम्॥*** (यजुर्वेदः 40/1)

**संयोगः**

वास्यम् + इदम् ।

### *सन्धिच्छेदः*

किम् + च ।

### *पदान्वयः*

जगत्याम् यत् किम् च जगत् ईशा वास्यम्। तेन त्यक्तेन भुञ्जीथाः, कस्यस्विद् धनम् मा गृधः।

### *शब्दार्थाः*

| | | |
|---|---|---|
| ईशा | = | ईश्वरेण |
| वास्यम् | = | आच्छादितम्, व्याप्तम् |
| जगत्याम् | = | संसारे |
| जगत् | = | परिवर्तनशीलं, गतिशीलम् चरम् अचरं वा। |
| भुञ्जीथाः | = | उपभोगं कुरु |
| मा गृधः | = | लोभं मा कुरु |
| कस्यस्विद् | = | कस्यचित् |

### *भावार्थः*

संसारे भौतिकपदार्थाः प्राणिनाम् एव उपभोगाय सन्ति परन्तु सर्वेषां वस्तूनाम् उपभोगः आसक्तिं विना एव कर्त्तव्यः। अन्येषां जनानां धनादिकां सम्पत्तिं प्रति लोभः न करणीयः ।

## *अनुप्रयोगः*

**1. अधोलिखितानां पदानां शुद्धोच्चारणं कृत्वा तेषाम् अनुलेखनम् क्रियताम् –**

क. समीक्षन्ताम् ..............................

ख. मित्रादभयममित्राद् ......................

ग. नश्चतस्त्रः ................................

घ. सन्त्वाप: ..................................

ङ. यत्किञ्च ................................

**2. पाठम् अनुसृत्य अधोलिखितेषु पदेषु सन्धिं सन्धिच्छेदं वा कुरुत –**

क. शम् + न: = ........................

ख. प्रदिशो भवन्तु = ........................ + ........................

ग. सर्वा: + आशा: = ........................

घ. उरुचक्षा उदेतु = ........................ + ........................

ङ. शम् + न: = ........................

**3. अधोलिखितानाम् अर्थानां स्थाने पाठे प्रयुक्तानि पदानि लिखत –**

| | *पदानि* | | *अर्था:* |
|---|---|---|---|
| क. | ........................ | = | पश्यामि |
| ख. | ........................ | = | कल्याणम् |
| ग. | ........................ | = | नयनम् |
| घ. | ........................ | = | वैरी |
| ङ. | ........................ | = | समक्षम् |
| च. | ........................ | = | गिरय: |
| छ. | ........................ | = | अस्माकम् |
| ज. | ........................ | = | जलानि |
| झ. | ........................ | = | परिचित: |
| ञ. | ........................ | = | निशायाम् |

## 4. उचितसर्वनामपदैः रिक्तस्थानपूर्तिं कुरुत -

क. सर्वे प्राणिनः ........................ मित्रदृष्ट्या पश्यन्तु। (अस्मद्)

ख. ........................ वस्तूनाम् उपभोगः आसक्तिं विहाय एव कर्तव्यः । (सर्व)

ग. ........................ त्यक्तेन भुञ्जीथाः। मा गृधः कस्यस्विद् धनम्। (तत्)

घ. दिने वा रात्रौ वा ........................ भयरहिताः भवेम। (अस्मद्)

ङ. अहं मित्रस्य चक्षुषा ........................ भूतानि समीक्षे। (सर्व)

## 5. पाठात् चित्वा विशेषणानि योजयत -

| *विशेषणानि* | | *विशेष्याणि* |
|---|---|---|
| क. | ........................ | पर्वताः |
| ख. | ........................ | भूतानि |
| ग. | ........................ | सर्वम् |
| घ. | ........................ | प्रदिशः |
| ङ. | ........................ | आशाः |
| च. | ........................ | सूर्यः |

## 6. अधोलिखितवाक्येषु कोष्ठकात् उचितं क्रियापदं विचित्य योजयत -

क. अहं मित्रस्य चक्षुषा सर्वाणि भूतानि ........................ । (समीक्षे/ समीक्षामहे)

ख. वयं अहर्निशं भयरहिताः ........................। (भवेयम् / भवेम)

ग. त्वं त्यागपूर्वकं वस्तूनि ........................ । (भुञ्जीथाः / भुञ्जीत)

घ. आपः अस्माकं कल्याणाय ........................ । (अस्तु / सन्तु)

ङ. सर्वाः दिशः मम मित्रं ........................ । (भवन्तु / भवतु)

7. **अधोलिखितान् प्रश्नान् संस्कृतभाषया उत्तरत -**

क. सर्वाणि भूतानि कथं द्रष्टव्यानि?

ख. इदं सर्वं जगत् केन व्याप्तम्?

ग. कति प्रदिशः अस्माकं कल्याणं कुर्वन्तु?

घ. ध्रुवयः पर्वताः अस्माकं कृते कीदृशाः भवेयुः ?

ङ. मम मित्रं काः भवन्तु?

च. केभ्यः अस्माकम् अभयं भवेत्?

8. **अधोलिखितेषु अन्वयेषु उचित-रिक्तस्थानपूर्त्तिं कुरुत -**

क. जगत्यां यत् किञ्च ...................... इदं सर्वम् ईशावास्यम्, तेन ...................... भुञ्जीथाः। कस्यस्विद् धनम् मा ......................।

ख. उरुचक्षा ...................... नः शम् उदेतु। चतस्रः ...................... नः शं भवन्तु।

ध्रुवयः पर्वताः —— शं भवन्तु। सिन्धवः नः शम्। उ ...................... शं सन्तु।

9. **अधोलिखितपङ्क्तीनां भावम् अनुसृत्य पाठात् चित्वा पङ्क्तिं लिखत -**

क. सकलाः दिशः मम मित्रभूताः सन्तु। ..........................................................

ख. सरितः सागराः च अस्माकं कल्याणं कुर्वन्तु । ..................................................

ग. सर्वे प्राणिनः मां मित्रवत् पश्यन्तु। ..........................................................

घ. सर्वः संसारः ईश्वरेण व्याप्तः। ..........................................................

10. **अधः केषाञ्चि श्लोकानां भावार्थः दत्तः। उचितपदैः रिक्तस्थानपूर्तिं कुरुत -**

क. सर्वे प्राणिनः मां ...................... पश्यन्तु। अहम् अपि तान् मित्रवत् ...................... यतः मित्रता सुखदायिनी भवति। यस्मिन् परिवारे समाजे वा ...................... स्नेहः भवति तत्र आनन्दमयं वातावरणं जायते। अतः जनेषु मैत्रीसम्बन्धः ........................... प्राप्नोतु।

ख. एषः जडचेतनरूपः संसारः ........................ व्याप्तः। संसारे लभ्याः ........................ आहारादिकं च प्राणिनाम् उपभोगाय सन्ति। वस्तूनाम् उपभोगः आसक्तिं .................... एव कर्तव्यः। अन्येषां जनानां धनादिकं प्रति ........................ न कर्तव्यः।

ग. अस्माकं जीवनं .............................. भवेत्। मित्रात्, शत्रोः परिचितात् नरात् वस्तुनः वा ........................ भयं न स्यात्। दिने वा ............................ वा वयं भयरहिताः भवेम। मित्रभूताः सर्वाः दिशः अस्मान् ........................।

## पाठ-विकासः

महान् ज्ञानराशिग्रन्थः वेदः। वेदाः चत्वारः सन्ति; ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदश्च इति। आदर्शा समाजव्यवस्था अत्र उपदिष्टा। यथा

संगच्छध्वं, संवदध्वं, सं वो मनांसि जानताम् । देवा भागं यथा पूर्वे संजानाना उपासते।।
(ऋ० : 1.191.2)

प्रतिगृहम् अपि परस्परं सम्मानभावः भवेत्।
अनुव्रतः पितुः पुत्रो, मात्रा भवतु संमनाः।
जाया पत्ये मधुमतीं वाचं वदतु शान्तिवाम्।। (अथर्व : 3.30.2)

अपि च

न स सखा यो न ददाति सख्ये। (ऋ० : 10.117.4)
केवलाघो भवति केवलादी। (ऋ० : 10.117.6)

पाठे प्रथमः मन्त्रः ऋग्वेदात्, द्वितीयः यजुर्वेदात्, तृतीयः अथर्ववेदात्, चतुर्थः च पुनः यजुर्वेदात् एव सङ्कलितः । एते मन्त्राः अस्मा मैत्रीभावस्य, समताभावस्य, भ्रातृत्वभावस्य पाठं शिक्षयन्ति ।

एते भावाः एव अधोलिखितेषु मन्त्रेषु अपि दत्ताः

## समानान्तरप्रयोगाः

मेधां मे वरुणो ददातु, मेधामग्निः प्रजापतिः,

मेधामिन्द्रश्च वायुश्च, मेधां धाता ददातु मे।। (यजु. 32/35)

वरुणः मह्यम् बुद्धिं ददातु, अग्निः प्रजापतिः अपि मह्यं बुद्धिं ददातु।

विश्वस्य धारणकर्ता ईश्वरः अपि मह्यम् बुद्धिं ददातु।।

शं नो मित्रा, शं नो भवत्वर्य्यमा,

शं न इन्द्रो बृहस्पतिः, शं नो विष्णुरुरुक्रमः।। (ऋ. 1/90/9)

मित्रः अस्मभ्यं सुखकरः भवतु, वरुणः, अर्यमा, इन्द्रः, बृहस्पतिः दूरात्दूरं गमने समर्थः विष्णुः एते सर्वे एव अस्मभ्यं सुखकराः भवन्तु।

यतो यतः समीहसे, ततो नो अभयं कुरु,।

शं नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः।। (यजु. 40/16)

हे देवानां देव! यस्मात् एव स्थानात् त्वं प्रकटितः भवसि, तस्मात् एव स्थानात् अस्मभ्यं निर्भयतां प्रयच्छ, अस्माकं सन्ततिः, पशवः च भयमुक्ताः भवेयुः।

अनमित्रं नो अधराद् अनमित्रं न उत्तरात्, इन्द्रानमित्रं नः पश्चाद् अनमित्रं पुरस्कृधि।।

हे इन्द्र! भवान् अस्मभ्यं सर्वतः शत्रुराहित्यं प्रददातु । सर्वतः अस्मभ्यं अभयदानं प्रापयतु।